Jan 2010

(1)

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथम पत्रिका

दिनाङ्कः – ३१-१-२०१० अङ्काः–१००

पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम् समयः–३-०० होराः

**1 एकवाक्येन उत्तरं लिखत । ( अष्टानामेव)** 1×8=8

१. भोजस्य कस्मिन् महानादरः आसीत् ?

२. विक्रमः योगिनमाह्वातुं कं प्रेषयामास ?

३. दुर्मुखः कुत्र न्यवसत् ?

४. द्रोणाचार्यः कः ?

५. वृक्षस्योपरि का स्थिता ?

६. शङ्कराचार्यस्य पिता कः ?

७. धीराः कस्मात् पदं न प्रविचलन्ति ?

८. तारकेण विप्रकृताः देवाः कुत्र ययुः ?

९. व्याधः कथम् आसीत् ?

१०. गणेशं के नमस्कुर्वन्ति ?

**2 वाक्यद्वयेन संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)** 2×5=10

१. षड् दोषाः के ?

२. वाग्देवता स्वहस्तेषु किं किं धारयति ?

३. गृहिणी द्विजं किम् अवदत् ?

४. कीदृशः पुरुषः न किञ्चित्कर्तुमर्हति ?

५. शङ्कराचार्यस्य प्रसिद्धाः शिष्याः के के ?

६. हनूमान् सीतां कथं आश्वासयामास ?

**3 संस्कृतभाषया उत्तरं लिखत। (त्रयाणामेव)** 3×3=9

१. अमरशक्तेः पुत्राः के ? ते कीदृशाः आसन् ?



पश्चादनुवर्तते

Jan 2010

(2)

२. के के त्याज्याः ?

३. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?

४. मल्लः परिकरं बध्वा राजानं किम् उवाच ?

**4 मातृभाषया उत्तरं लिखत । (त्रयाणामेव)** 3×4=12

१ 'एकलव्यस्य गुरुभक्तिः' अस्य पाठस्य सारांशं लिखत ।

२. विक्रमस्य औदार्यम् पाठस्य सारांशं संक्षेपेण लिखत ।

३. 'नहि कृतमुपकारं साधवो विस्मरन्ति' कथं विवृणुत ।

४. देवैः ब्रह्मस्तवः कथं कृतम् ? निरूपयत ।

**5 ससन्दर्भं स्वोत्तरभाषया लिखत । (चतुर्णाम्)** 4×3=12

१. स च वेदवेदाङ्गवित् ।

२. अतिथिसत्कारः श्रेयस्करः ।

३. शरप्रयोगे बलवत्तरः भविष्यसि ।

४. भवति, भिक्षां देहि ।

५. अत्र स्थित्या वयं निहताः ।

**6 द्वयोःअन्वयानुसारम् अर्थं स्वेष्टभाषया लिखत ।** 2×3=6

१. अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।

२. सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ।।

३. मा विषादं कृथा देवी राघवो रावणं रणे ।
हत्वा त्वां नेष्यतीत्येनां आश्वास्य स विनिर्ययौ ।।

**7 श्लोकद्वयं पूर्णं कुरुत ।** 2×2=4

१. यथा कन्दुक ................................. पतनं यथा ।।

२. रविनिशाकर ..................................... मे मतिः ।।

३. आद्यायामित ....................................... नतिः शम्भवे ।।

**8 स्वोत्तरभाषया भाषान्तरं कुरुत ।** 5

द्रोणस्तु मुहूर्तं विचार्य अर्जुनेन सह वनमगच्छत् । तत्र स्वाकृतिविराजितप्रतिमायाः पुरतः अस्त्रविद्याभ्यासनिरतं एकलव्यम् अपश्यत् । स नु आयान्तं द्रोणमवलोक्य तम् उपसङ्गम्य शिरसा प्रणम्य अर्घ्यपाद्यादिभिः आराधयामास ।

**9 रिक्तस्थानं पूरयत ।** 4x1=4

१. स च ..................... तपोनिष्ठश्चासीत् ।।

२. एकलव्यस्य पिता ..................... ।

३. .................. कश्चित् उज्जयिनीम् आगच्छत् ।

४. पुरा वज्रजङ्घो नाम ................. अविद्यत ।

**10 समानार्थकपदं लिखत । (त्रयाणामेव)** 3x1=3

१. मेघः २. हायनः ३. प्रत्यहम् ४. वैदेही

**11 विरुद्धार्थकपदं लिखत (त्रयाणामेव) ।** 3x1=3

१. प्रकाशः २. बन्धनम् ३. दिवा ४. सद्बुद्धिः

**12 वाक्यं रचयत । (त्रयाणामेव)** 3x1=3

१. एकदा २. पश्चात् ३. श्रुतः ४. अन्तः

**13 सर्व पुरुषवचनेषु लिखत । (एकस्य)** 3x1=3

१. पठ्यताम् २. अश्नातु ३. क्षीयते

**14 सन्धिं विभज्य नाम लिखत । (त्रयाणामेव)** 3x1=3

१. अब्रवीच्च २. केयम् ३. अतस्तस्य ४. यन्ममैते



पश्चादनुवर्तते

**15 लोकोक्तिं पूरयित्वा अर्थं स्वोत्तरभाषया विवृणुत । (एकस्य)** 1x3=3

१. सम्भावितस्य ............................ अतिरिच्यते ।

२. क्लेशः ........................... विधत्ते ।

**16 व्याकरणविशेषं लिखत । (एकस्य)** 1x2=2

१. गुरुभ्यो नमः २. भवान् आगच्छतु

**17 प्रयोगपरिवर्तनं कुरुत । (द्वयोः)** 3

१. हरिः लोकं रक्षति ।

२. शिष्येण पाठः पठ्यते ।

३. अश्वः वेगेन धावति ।

**18 वाक्यदोषं परिहरत ।** 2x1=2

१. पिता ग्रामः गच्छति ।

२. कालिदासः भोजस्य आस्थाने आसन् ।

**19 समूहेतरपदं लिखत ।** 3x1=3

१. लोचननम् - आस्यम् - नयनम् - नेत्रम्

२. सीता - राधा - राजा - वीणा

३. तदपि - अद्यापि - तथापि - मान्यथा

**20 कर्तृ-कर्म-क्रियापदानि सूचयत ।** 2x1=2

१. मया सः शुश्रूषितः ।

२. राजा विक्रमो भवन्तमाह्वयति ।

★★★★★

Jan 2010

(5)

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः - ३१-१-२०१० | अङ्काः-५०

अपराह्णे - १-३० तः ३-०० पर्यन्तम् | समयः-सार्धैकहोरा

**1 दशाभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत :- (एकमधिकृत्य)** 1x5=5

१. पुस्तकालयः  २. गङ्गानदी  ३. धेनुः

**2 संस्कृतभाषया पत्रमेकं लिखत :-** 1x5=5

१. धनप्रेषणार्थं पितरं प्रति पत्रम् ।

२. दिनद्वयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रम् ।

**3 द्वयोः लक्षणं सोदाहरणं आङ्ग्लभाषया कर्णाटकभाषया वा लिखत।** 2x3=6

१. कर्मणि प्रयोगः  २. शतृप्रत्ययः  ३. अव्ययम्

**4 सर्वपुरुषवचनेषु लिखत । (द्वयोः)** 2x3=6

१. मोदताम्  २. लिखेत्  ३. पठिष्यति

**5 एकस्य रूपाणि सर्वविभक्ति वचनेषु लिखत ।** 1x4=4

१. पितृ  २. एतत् (पु)  ३. युवन्

**6 वाक्यदोषान् परिहरत :-** 3x1=3

१. द्रोणस्य सह अर्जुनः अगच्छत् ।  २. भवान् गृहं गच्छ ।

३. ग्रामस्य समया उद्यानं वर्तते ।

**7 प्रयोगं परिवर्तनं कुरुत :-** 3x1=3

१. बाणः कदाम्बरीं अलिखत्।  २. बालेन पाठः पठ्यते ।

२. खगाः आकाशे चरन्ति ।



पश्चादनुवर्तते

Jan 2010

⑥

**8** **कृदन्तपदं चित्वा नाम लिखत :-** 3x1=3

१. विप्राः स्नातुं नदीम् अगच्छन् ।
२. छात्रः पाठं विलिख्य पठति ।
३. एधमानं सस्यं पश्य ।

**9** **अन्यलिङ्गरूपं लिखत :-** 3x1=3

१. चतुरः    २. कविः    ३. एतस्याः

**10** **वाक्यमेकं विवृणुत :-** 1x2=2

१. अति सर्वत्र वर्जयेत् ।
२. दण्डं दशगुणं भवेत् ।

**11** **मातृभाषया अनुवादं कुरुत :-** 5x1=5

१. अर्जुनः मृगयां कर्तुं वनम् अगच्छत् ।
२. बालाः प्रतिदिनं सायङ्काले क्रीडन्तु ।
३. रणाङ्गणे सैनिकाः अम्रियन्त ।
४. ह्यः गणेशः ग्रामं गतवान् ।
५. काशीनगरे एकः विद्वान् आसीत् ।

**12** **संस्कृतभाषया अनुवदत कुरुत :-** 5x1=5

१. ರಾಧೆಯು ನಾಳೆ ಕಾಶಿಯಿಂದ ಬರುವಳು.
Radha is coming from Kashi tomarrow.

२. ಮೀನುಗಳು ನೀರಿಲ್ಲದೆ ಬದುಕುವುದಿಲ್ಲ.
Fishes cannot live without water.

३. ಗೋದಾವರೀ ನದಿಯ ತೀರದಲ್ಲಿ ಒಂದು ದೊಡ್ಡ ಬೂರಗದ ಮರವು ಇತ್ತು.
There was a big Silk Cotton tree on the bank of river Godavari.

४. ನಾವು ಭಗವದ್ಗೀತೆಯನ್ನು ಓದಲು ಇಚ್ಛಿಸುತ್ತೇವೆ.
We like to read Bhagavadgeetha.

५. ಸರೋವರದಲ್ಲಿ ಕಮಲವು ಬೆಳೆಯುತ್ತವೆ.
The lotus grows in a pond.

★ ★ ★ ★ ★